


परम पूज्य तपश्चर्या–चक्रवर्ती पट्टाधीशाचार्यश्री

## सुविधिसागर जी महाराज

के

50 वें जन्मदिवस के पावन अवसर पर

सुविधि–परिवार के द्वारा आयोजित

## जिनवाणी-महोत्सव

# सहस्रग्रन्थसंग्रह

* जन्मदिवस 19–03–1971 * मुनिदीक्षा–11–05–1989 * आचार्यपद– 20–06–2004

पट्टाधीशपद– 24–12–2010 (20–06–2004 को की गई उद्घोषणा के अनुसार)

परम पूज्य आचार्यश्री सन्मतिसागर जी महाराज के द्वारा की गई उद्घोषणा:–

हमारी समाधि के पश्चात् आपको इस संघ के संचालकपद पर नियुक्त करते हैं।

(अंकलीकर वाणी–जुलाई 2004) (अक्षयज्योति–अक्तूबर 2004)

# प्रमेयकण्ठिका

ग्रन्थकर्त्ता

शान्ति वर्णी जी

सम्पादक

परम पूज्य आचार्यश्री सुविधिसागर जी महाराज

प्रकाशक

श्री भरतकुमार पापड़ीवाल

औरंगाबाद (महाराष्ट्र)

(परम्परानायक)



परम पूज्य चारित्र–चक्रवर्ती,
आचार्यश्री आदिसागर जी महाराज
(अंकलीकर)

(द्वितीय पट्टाधीश)



परम पूज्य तीर्थभक्त–शिरोमणि,
आचार्यश्री महावीरकीर्ति जी महाराज

(तृतीय पट्टाधीश)



परम पूज्य सिद्धान्त–चक्रवर्ती,
आचार्यश्री सन्मतिसागर जी महाराज

(चतुर्थ पट्टाधीश)



परम पूज्य तपश्चर्या–चक्रवर्ती, आचार्यश्री सुविधिसागर जी महाराज

दिगम्बर साधु निरन्तर पगविहार करते रहते हैं। ग्रन्थभण्डार को साथ में रख कर विहार करना अशक्यप्राय: होता है। फलत: उनको ग्रन्थों के सन्दर्भ देखने में असुविधा होती है। उनकी सुविधा के लिये इस कोश का निर्माण किया गया है। इस कोश के निर्माण में किसी भी प्रकार का व्यापारिक हेतु नहीं है।

आर्थिक दृष्टि से सम्पन्न श्रावकबन्धुओं से निवेदन है कि वे ग्रन्थ का विक्रय कर अध्ययन करने की परम्परा को कायम रखें।

मुखपृष्ठ पर हमने ग्रन्थकर्त्ता, अनुवादक, सम्पादक, प्रकाशक आदि के नाम दिये हैं। किसी संस्थान का कर्तृत्व हमने लुप्त नहीं किया है।

इस कोश के लिये आवश्यक ग्रन्थ हमें अनेक स्रोतों से प्राप्त हुये हैं। हम उन सभी का आभार मानते हैं।

सुविधि–परिवार

श्री शान्तिवर्णिविरचिता

# प्रमेयकण्ठिका

## प्रथम स्तबकः

### मंगलाचरण

**श्री वर्द्धमानमानम्य, विष्णुं विश्वसृजं हरम्।**
**परीक्षामुखसूत्रस्याद्यस्यार्थं विवृणोम्यहम्।।**

अथ स्वापूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणम् (परीक्षामुख = १/१) इति प्रमाणलक्षणं बाधातीतम्। नान्यत्। युक्तिशतबाधितत्वात्।

ननु स्वापूर्वार्थेति लक्षणे यानि विशेषणान्युपात्तानि तानि निरर्थकानीति चेन्न।

परप्रतिपादितानेकदूषणवारकत्वेन तेषां सार्थकत्वात्।

तथाहि–किं तद्दूषणम्? अनिष्टं रूपं, तदनिष्टम्।

ज्ञानं प्रमाणम् इत्युक्तेनिर्विकल्पकज्ञानस्यापि प्रामाण्यं स्यादित्यापादन–मेवानिष्टमस्माकं जैनानाम्। तदतन्निवारकत्वेन व्यवसायविशेषणस्य सार्थकत्वम्।

एवमितरेषां विशेषणानां सार्थकत्वं योजनीयम्।।१।।

अथ लक्षणे तदेव विशेषणं सार्थकं यदव्याप्त्यतिव्याप्त्यसम्भव–दोषनिवारकम्। यथा हेतौ व्यभिचारवारकविशेषणं सार्थकम्। इदम–नुपपन्नम्। क्वचिद्धेतावसिद्धिवारकविशेषणस्यापि सार्थकत्वात्। तथाहि–चक्षुस्तैजसम्, रूपादीनां मध्ये रूपस्यैवाभिव्यञ्जकत्वात् इति हेतौ रूपादीनां मध्य इति विशेषणस्यासिद्धिवारकत्वम्।

कथमसिद्धिवारकत्वं रूपस्यैवाभिव्यञ्जकत्वादित्युक्ते चक्षुषि रूपस्यैवा –भिव्यञ्जकत्वमसिद्धम्, रूपत्वस्यापि व्यञ्जकत्वात्। अत उक्तम्–रूपादीनां मध्य इति। तेषां मध्ये रूपत्वस्यानन्तर्भावात्। तद्विशेषणस्या–सिद्धिवारकत्वेन सार्थकत्वमिति चेन्न। हेतौ व्यभिचारवारकविशेषणस्यैव सार्थकत्वात्।।२।।

नन्वसिद्धिवारविशेषणस्याप्रसिद्धिवारकविशेषणतया सार्थकत्वमिति वाच्यम्। तथाहि– रूपस्यैवाभिव्यञ्जकत्वं तेजसोऽप्रसिद्धम्। न हि प्रदीपादौ रूपमात्रप्रकाशकत्वम्। रूपत्वस्यापि प्रकाशकत्वात्। ततस्सिद्धमप्रसिद्धि–वारकतया विशेषणस्य तस्य सार्थकत्वम्। साधूक्तम्। यथा हेतौ व्यभिचार –वारकविशेषणमेव सार्थकमिति न नियमः तथा लक्षणेऽप्यतिव्याप्त्यादि–वारकविशेषणमेव सार्थकमिति न नियमः, अन्यस्यापि विशेषणस्य सार्थकत्वदर्शनात्।।३।।

किञ्च, सूत्रोपात्तानि तानि विशेषणानि, अतिव्याप्तिवारकतयापि सार्थकानि भवन्ति। तथाहि–ज्ञानं प्रमाणम् इत्युक्ते पराभ्युपगते निर्विकल्पकेऽ –तिव्याप्तिर्भवेत्। तद्वारणार्थं व्यवसायग्रहणम्।

व्यवसायात्मकं ज्ञानं प्रमाणम् इत्युक्ते भ्रमेऽतिव्याप्तिस्तन्निरासार्थमर्थग्रहणम्।

अर्थव्यवसायात्मकं ज्ञानं प्रमाणम् इत्युक्ते नैयायिकाभ्युपगतधारावाहिके ज्ञानेऽतिव्याप्तिः। तन्निरासार्थमपूर्वग्रहणम्।

अपूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणम् इत्युक्ते मीमांसकाभ्युगतपरोक्ष–ज्ञानेऽतिव्याप्तिः। तन्निरासार्थं स्वपदोपादानम्।

ततस्तानि विशेषणानि सार्थकान्यतिव्याप्तिवारकत्वात्।।४।।

ननु स्वापूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणम् इति प्रमाणलक्षणं स्मरणेऽ–व्याप्तम्। लक्ष्यैकदेशे स्मरणेऽपूर्वार्थव्यवसायात्मकज्ञानत्वाभावात्। तत् स्मरणमप्रमाणमिति चेन्न। स्मरणस्याविशदार्थरूपापूर्वार्थविषयत्वात्। अथ

सकलवादिप्रसिद्धं तावत्स्मृतेरनुभूतार्थविषयत्वम्।

तस्य यद्यविशदार्थविषयत्वं तर्हि अनुभूतार्थविषयत्वं भज्येत्। अनुभवे ह्यविशदार्थविषयत्वाभावात्। ततो न स्मरणस्यानुभूतार्थविषयत्वम्, तस्य तत्राव्याप्ति। नाप्यननूभूतार्थविषयत्वम्, अतिप्रसङ्गात्। न चातिप्रसङ्गः। एकस्यैवार्थस्य प्रत्यक्षे विशदतया विषयत्वात्। अविशदतया स्मरणे विषयत्वात्। तथा च वैशद्यावैशद्यभेदादर्थभेद एवेत्यनुभवस्मरणयोर्भिन्नविषयत्वं स्यात्। भिन्नविषयत्वेऽतिप्रसङ्गस्तदवस्थ एव।।५।।

ननु विशेषणभेदादर्थभेदे प्रतिक्षणं यत् किञ्चिद्विशेषणस्यावश्यकत्वेन प्रतिक्षणमर्थभेदस्स्यात्। तथा च प्रत्यभिज्ञानं कुत्रापि न स्यात्। मास्तु विशेषणभेदादर्थभेदस्तथापि पूर्वोक्तदोषः तदवस्थ एव।।६।।

न च प्रमाणलक्षणाभावात् स्मृतिरप्रमाणमिति वाच्यम्। स्मृतेस्स्वविषयसमारोपव्यवच्छेदकेन प्रामाण्यात्। किञ्च, अविसंवादित्वात्स्मृतिः प्रमाणं, प्रत्यक्षादिवत्। यत्र त्वस्ति विषयविसंवादः, तत्र स्मरणस्याभासत्वं प्रत्यक्षाभासवत्। भवतु वा स्मरणं त्वदुक्तरीत्या प्रमाणं तथापि तत्र तस्याव्याप्तिर्न परिहृतैवेति चेन्न। स्वापूर्वार्थव्यवसायात्मकं ज्ञानमित्यस्य लक्षणस्य स्मृतेरपि सम्भवात्।।७।।

ननु कथमननुभुते विशदत्वे स्मरणस्य प्रवृत्तिः सम्भवतीति चेन्न। विशेषरूपस्यार्थस्यानुभूतत्वात्। अतस्तत्र तस्य प्रवृत्तिस्सम्भवत्येव। अन्यथा तत्तावच्छिन्ने विषयस्मरणं न स्यात्। तत्ताया अननुभूतत्वात्, ततो यथाननूभूतायां तत्तायां स्मरणस्य प्रवृत्तिस्तद्वदस्पष्टत्वेऽपीति न कश्चिद्दोषः।।८।।

अथ नयेऽस्य लक्षणस्यातिव्याप्तिः। तथा हि–अनिराकृतप्रतिपक्षो वस्त्वंशग्राही ज्ञातुरभिप्रायो नयः–इति नयलक्षणम्। सोऽपि ज्ञानरूप एव। स च न प्रमाणं वस्त्वंशग्राहित्वात्। तथा चाप्रमाणरूपेऽलक्ष्ये लक्षणस्य गतत्वादतिव्याप्तिः। न चातिव्याप्तिः। द्रव्यपर्यायात्मकस्यार्थत्वात् , नयस्य तद्विषयत्वाभावाल्लक्षणे नयातिरिक्तत्वे सति विशेषणस्य दानाद्वा।।९।।

ननु नयःप्रमाणमप्रमाणं वा। न तावत्प्रमाणं वस्त्वंशग्राहित्वात्। न तावदप्रमाणं अर्थाव्यभिचारित्वात्। किन्तु प्रमाणैकदेशः। यथा समुद्रांशो न समुद्रो नाप्यसमुद्रः, किन्तु समुद्रैकदेशः।।१०।।

ननु सूत्रे स्वीकृतो यो व्यवसायस्स च किं समारोपविरोधीति वार्थः, आहोस्वित्सविकल्परूपो वा। न तावदाद्यः पक्षः। बहिरर्थापह्नोतॄणां ब्रह्माद्वैतवादिनां विपर्यासस्यार्थविशेषणेन व्युदाससम्भवात्। तस्माद्द्वितीयः पक्षोऽङ्गीकर्त्तव्यः।।११।।

ननु ज्ञानरूपस्य प्रमाणस्य किं फलमिति चेदज्ञाननिवृत्तिः फलम्। अथ अज्ञाननिवृत्तिः संशयविपर्यासानध्यवसायस्य निवृत्तिर्वा आहोस्विद् ज्ञानाभावस्य निवृत्तिर्वा। न तावत्प्रथमः पक्षः। घटोऽस्ति न वेत्यसंशयितुः पुंसः घटोऽयमिति प्रतीतेः। न च तत्र संशयनिवृत्तिः। प्राप्तिपूर्वकत्वात्प्रति –षेधस्य। ततोऽज्ञानं ज्ञानाभावमित्यङ्गीकर्त्तव्यम्। तच्च ज्ञानात्पूर्वमाव–श्यकमिति तन्निवृत्तिस्तु सम्भवत्येव।।१२।।

नन्वज्ञाननिवृत्तिः प्रमाणभूतं ज्ञानमेव। तथा चाभेदे कार्यकारणभावो नोपपद्यते। गुणगुणिभाववत्।।१३।।

ननु गुणगणिनोरभेदे किं बाधकम्। तथाहि–शुक्लपटयोरभेदे घटः कलश इतिवत्। शुक्लः पट इति सह प्रयोगो न स्यात्। अन्धस्य पटग्रहवत् रूपग्रहः। रूपाग्रहवत् पटाग्रहोऽपि स्यात्। महारजन्यां रक्ते पटग्रहवत्। शुक्लग्रहः शुक्लाग्रहवत् पटाग्रहोऽपि स्यात्। पटमानयेत्युक्ते यं कश्चिच्छुक्लमानयेत्। अपटः पट इतिवत्। अशुक्लः पट इति विरुध्येत्। पटशुक्लयोरभेदात्। अनलसंयोगादेकत्र श्यामरक्तयोर्विनाशोत्पादे घटस्य तौ स्याताम्। तयोरपि तौ न स्याताम्।।१४।।

अथ अन्धस्य शुक्लादिप्रतीतिरस्त्येव द्रव्यत्वेन न तु शुक्लत्वेनेति चेत्। शुक्लत्वमधुरत्वोष्णत्वादीनां द्रव्यवृत्तित्वेन द्रव्यग्राहकत्वगादिभिरन्धादीनां ग्रहणप्रसङ्गात्।।१५।।

ननु रूपत्वादीनां प्रतिनियतेन्द्रियग्राह्यत्वान्नैवमिति चेन्न। रूपत्वादीनां द्रव्यवृत्तित्वे प्रतिनियतेन्द्रियग्राह्यतैव न स्यात्। योग्यद्रव्यवृत्तित्वेन जातेर्ग्रहणयोग्यत्वात्। तस्माद्रूपत्वादीनां प्रतिनियतेन्द्रियग्राह्यतापि गुणगुणिभेदे मानमभेदे च कथं पटस्य शुक्लरूपम्। पटश्शुक्लरूपवानिति प्रतीतिप्रसङ्गश्च।।१६।।

नन्वेकान्ताभेदे सर्वमिदं दूषणम्। तयं तु भेदाभेदवादिनस्तथा च न भेदमादाय पौनरुक्त्यादि। अत्यन्तमभेदे भेदे च न सामानाधिकरण्यमिति। तत एव भेदाभेदसिद्धिः। न च भेदाभेदयोः परस्परविरहरूपतया विरुद्धयोः कथमेकत्र समावेशः, इति वाच्यम्,

संयोगतदभावयोरिव अविरोधात्। पाकानन्तरं रक्तोऽयं न श्याम, इत्यबाधितानुभवबलात्तत्रैव तदन्योन्याभावसिद्धेस्त्वयापि भेदाभेदस्वीकारात्।।१७।।

ननु वृक्षेऽवच्छेदभेदेन संयोगतदभावौ वर्तेते ज्ञायेते च। तथा च श्यामावच्छिन्नस्य तस्यान्योन्याभावस्तत्रैव रक्तावच्छिन्ने तदन्योन्याभाव–श्च श्यामावच्छिन्ने तद्वदिहापि नीलस्यान्योन्याभावो घटत्वावच्छेदेनेति नीलाद् घटभेदोऽस्तु।

अभेदस्तु नीलान्योन्याभावाभावरूपो घटे। न घटत्वावच्छेदेन विरोधात्। एकावच्छेदेन भावाभावयोरेकत्र वृत्तेरज्ञानाच्च। नाप्यवच्छेदकान्तरेण, घटे तदभावात्। तदज्ञानेऽपि नीलो घट इत्यनुभवाच्च।।१८।।

नन्वेकावच्छेदेन भावाभावयोरेकत्रावृत्तिरिति यदुक्तं तन्नोपपद्यते। तथाहि – इह भूतले घटाभाव इति योऽभावस्स तु किमन्योन्याभावो वा, प्रागभावो वा, प्रध्वंसाभावो वा, अत्यन्ताभावो वा? न तावदन्योन्याभावः संसर्गाभावत्वेनोपस्थिततत्वात्। न प्रागभावप्रध्वंसौ प्रतियोगिसमानकाल–त्वात्। अतोऽत्यन्ताभावोऽङ्गीकर्त्तव्यः। सोऽत्यन्ताभावो नित्यः। यथा घटापसारणानन्तरं भूतले घटात्यन्ताभावः प्रवर्तते। तथा तत्र घटवत्तादशायामप्यभाव इत्येकावच्छेदेन घट तदभावयोर्वृत्तिरविरुद्धेति त्वयाप्यङ्गी–कर्त्तव्यमेव।।१९।।

ननु भावाभावौ विरुद्धावित्यत्र विरोधस्तावद् विशेषणम्। तेन सह तयोः कः सम्बन्धः। संयोगो वा, समवायो वा, विशेषणभावो वा। न तावत्संयोगोऽद्रव्यत्वात्। नापि समवायः द्रव्यगुणकर्मसामान्यविशेष–व्यतिरिक्तत्वात्। नापि विशेषणभावः सम्बन्धान्तरेण सम्बद्धे वस्तुनि विशेषणभावस्याप्यसम्भवात्। अन्यथा दण्डपुरुषादौ संयोगादिसम्बन्धाभावेऽपि स स्यात्।

इत्यलं संयोगादिसम्बन्धकल्पनाप्रयासेन। अथ यत्र संयोगो न सम्भवति, न वा समवायः, तत्र विशेषणविशेष्यभावः सम्बन्धोऽङ्गीक्रियते। दण्डपुरुषादौ तु संयोगादिसम्बन्धः सम्भवत्येव। सति सम्भवत्वे त्यागायोगात्। प्रकृते तु न सम्भवति। अतो विशेषणभावः सम्बन्धोऽङ्गीकृत इति।।२०।।

ननु विशेषणभावः षट्पदार्थेभ्यो भिन्नो वा अभिन्नो वा? भिन्नश्चेत्किं भावरूपो वाभावरूपो वा? न तावद्भावरूपः। षडेव भावपदार्थ इति नियम –विरोधात्। नाप्यभावरूपोऽनभ्युपगमात्। अभेदेऽपि न तावद्द्रव्यं गुणाश्रितत्वाभावप्रसङ्गात्। अत एव न गुणोऽपि नापि कर्म, कर्माश्रितत्वाभावानुषङ्गात्। अकर्मकर्मेत्यभिधानात्। नापि सामान्यं समवाये तदभावापत्तेः पदार्थवृत्तित्रयवृत्तित्वात्तस्य। नापि विशेषो विशेषाणां नित्यद्रव्याश्रितत्वादन्यत्र द्रव्ये चास्योपलम्भात्। न समवायः समवाये तदभावात्। तथा च विशेषणभावो गगनारविन्दसदृश इति, तस्माद्भावाभावौ विरुद्धाविति कथमिति चेत्। तस्मान्न प्रमाणफलयोः सर्वथाभेदः। नापि भेदस्तयोः सर्वथाभेदे कार्यकारणभावस्यैवासम्भवात्। यदि भिन्नयोरपि कार्यकारणभावः स्यात्तर्हि भिन्नयोरपि सह्यविन्ध्ययोः कार्यकारणभावः स्यात्। अथ समवायाभावान्न कार्यकारणभावस्तयोरिति चेत्।

समवायोऽपि कुतो नेति चेत्। अवयवावयव्यादिभावाभावात्, अवयवावयव्यादिकाभावोऽपि कुतो न भवेत्। तथा प्रतीत्यभावात्। सापि कुतो नेति चेत्। समवायाभावात्। तथा सति चक्रकप्रसङ्गः। तथाहि–सिद्धे हि समवाये अवयवावय–व्यादिभावसिद्धिः। तत्सिद्धौ समवायसिद्धिरिति।।२१।।

किञ्च, समवायसद्भावे किं प्रमाणम्। प्रत्यक्षमिति चेत्। तदयुक्तम्। अर्थानामसाधारणस्वरूपत्वे सिद्धे सिध्येत् प्रत्यक्षता। पृथुबुध्नोदराद्याकारकघटादिवत्। न चास्य तत्सिद्धम्। तद्धि किमयुतसिद्धसम्बन्धत्वं सम्बन्धमात्रं वा। न तावदयुतसिद्धसम्बन्धत्वम्। सर्वैरप्रतीयमानत्वात्। यत्पुनः यत्स्वरूपं तत्तेन स्वरूपेण प्रतिभासते। यथा पृथुबुध्नोदराद्याकारतया घट इति। न चैकस्य सामान्यात्मकं स्वरूपं युक्तम्। समानानामभावे सामान्याभावात्। गगने गगनत्ववत्। नापि सम्बन्धमात्रं समवायस्यासाधारणं स्वरूपं संयोगादावपि सम्भवात्। ततोऽसाधारणस्वरूपासिद्धौ समवायस्य तत्सद्भावे न प्रत्यक्षं प्रमाणम्।।२२।।

इह तन्तुषु पट इत्यादि प्रत्ययः सम्बन्धकार्योऽबाध्यमानेह प्रत्ययत्वात्। इह कुण्डे दधीत्यादि प्रत्ययवदित्यनुमानं प्रमाणमिति चेन्न। हेतोराश्रया–सिद्धत्वात्। तदसिद्धत्वं च इह तन्तुषु पट इत्यादि प्रत्ययस्य धर्मिणोऽसिद्धे। अप्रसिद्धविशेषणश्चायं हेतुः। पटे तन्तवो वृक्षे शाखा इत्यादि रूपतया प्रतीयमानप्रत्ययेन इह तन्तुषु पट इति प्रत्ययस्य बाध्यमानत्वात्। स्वरूपासिद्धश्च। तन्तुपटप्रत्यये इह प्रत्ययस्यानुभवाभावात्। पटोऽयमित्यादिस्वरूपतया हि प्रत्ययाननुभूतेऽनैकान्तिकश्च। इह प्रागभावेऽनादित्वमिह प्रध्वंसाभावे प्रध्वंसाभावाभाव इति प्रत्ययात्। तस्मान्न समवायसद्भावेऽनुमानं प्रमाणम्।।२३।।

किञ्चायं समवायः, असमवायिनोः समवायिनोर्वा परिकल्प्यते। यद्यसमवायिनोस्तर्हि घटपटयोरप्येतत्प्रसङ्गः। अथ समवायिनोः कुतस्तयोः समवायित्वम्, समवायात् , स्वतो वा। समवायाच्चेत्, अन्योन्याश्रयसिद्धे हि समवायत्वे तयोः समवायः। तस्माच्च तत्त्वमिति। किञ्चाभिन्नं तेनानयोः समवायित्वं विधीयते भिन्नं वा। न तावदभिन्नं तद्विधाने गगनादीनां विधानानुषङ्गात्। भिन्नं चेत्तयोस्तत् सम्बन्धित्वानुपपत्तिः। सम्बन्धान्तरकल्पनेऽनवस्था। तत एव तन्नियमे इतरेतराश्रयः। सिद्धे हि समवायिनोः समवायित्वनियमे समवायनियमसिद्धिरिति। स्वत एव समवायिनोः समवायित्वे किं समवायेन। ततो न सर्वथा प्रमाणफलयोर्भेदः। ततः प्रमाणात्फलस्य भिन्नत्वमभिन्नत्वं चोररीकर्त्तव्यम्।।२४।।

ननु कथं प्रमाणात्फलस्य भिन्नत्वमभिन्नत्वं चेति चेत्। आत्मनो हि पर्यायपरिच्छित्तौ साधकतमत्वेन व्याप्रियमाणं स्वरूपं प्रमाणं निर्व्यापारम्। व्यापारस्तु क्रियास्वातन्त्र्येण व्याप्रियमाणं प्रमाणता इति कथञ्चिद्भेदः। पूर्वपर्यायान्वितस्य प्रत्ययस्य प्रमितिविशेषण–रूपतयोत्पत्तेरभेदः। अथवा ज्ञानत्वेन तयोरभेदः प्रमाणत्वेन फलत्वेन भेद इति।

**इति शान्तिवर्णिविरचितायां प्रमेयकण्ठिकायां प्रथमस्तबकः।।**

श्री शान्तिवर्णिविरचिता

# प्रमेयकण्ठिका

## द्वितीय स्तबकः

अथ प्रमाणस्य प्रमाकरणं प्रमाणम् इत्येतल्लक्षणमेवास्त्विति चेन्न, विचारासहत्वात्। तथाहि–प्रमाकरणं प्रमाणमित्यत्र का वा प्रमा यस्याः करणं प्रमाणं भवेत्। यथार्थानुभवः प्रमा इति प्रमालक्षणमिति चेन्न। तत्र यथाशब्दार्थः सादृश्यं ज्ञाने घटत्वादीनां तस्याभावात्। प्रमेयत्वेन सादृश्ये भ्रमेऽपि गतत्वात्। नापि गुणजन्यानुभवः प्रमा। अन्योन्याश्रयात्। सिद्धे गुणे तज्जन्यानुभवः प्रमा, इति प्रमासिद्धिः। तत्सिद्धौ च गुणसिद्धिरिति। नापि अबाधितानुभवः प्रमा बाधस्य विपरीतप्रमात्वात्। तथा चात्माश्रयः। तद्वति तत्प्रकारानुभवः प्रमा इत्यपि न। निर्विकल्पकप्रमायामव्याप्तेः।।१।।

अस्तु तावदिदं यथाकथञ्चित् प्रमालक्षणम्। तथापि प्रमाकरणं प्रमाणलक्षणमिन्द्रियरूपेऽप्रमाणेऽव्याप्तम्। तेन करणेन प्रमाया अजननात्। तथाहि–प्रमाकरणं प्रमाणमित्यत्र किं करणम्। साधकतमं करणम्। किं तत्साधकतमत्वम्। करणस्यातिशयितत्वम्। तदपि किं व्यापारत्वम्। तथा च सकलकरणानां क्रियाप्रसिद्धौ व्यापारवत्करणमिति व्यापारवत्त्वेन कर्त्रादीनां करणत्वं समागतमिति चेन्न, प्रमाकरिघटादौ प्रमेये सति प्रमानुत्पत्तेः। न चेन्द्रिये सत्यवश्यं प्रमोत्पत्तिरिति तस्य करणत्वमिति वाच्यम्। सतीन्द्रिये प्रमानुत्पत्तेस्तथा च तत्र तस्याव्याप्तिः।।२।।

किञ्चेदं लक्षणमसम्भवि, लक्ष्ये सन्निकर्षादौ करणत्वासम्भवात्। सम्यग्ज्ञानस्यैव करणत्वात्। किञ्च सन्निकर्षादिर्न करणमसाधकतमत्वात्। घटवत्।।३।।

नन्विदं साधनमसिद्धम्। समनस्कादुष्टेन्द्रियार्थसन्निकर्षेसत्यविलम्बेन प्रमोत्पत्तिरिति चेन्न, समनस्कादुष्टेन्द्रियसन्निकर्षेस्याविलम्बेन प्रमोत्पाद–कत्वमसिद्धमेव। आकाशे तत्सद्भावेऽपि तदभावात्।।४।।

तत्रोद्भूतरूपसहकारिणोऽभावात् सा न भवतीति चेत्तर्हि अन्धकारवति प्रदेशे विद्यमानस्य घटादेश्चाक्षुषसाक्षात्कारः स्यात्। तत्रोद्भूतरूपवत्त्वस्य सन्निकर्षस्य च विद्यामानत्वात्।।५।।

तत्राल्लोकाभावान्न घटादेः प्रतीतिरिति चेन्न। आलोकस्य घटादिप्रतीता–वकारणत्वात्। कारणत्वे वा नक्तञ्चरादीनां अन्धकारे प्रतीतिर्न स्यात्। आलोकाभावात्। न चालोकाभावः पेचकादीनां चक्षुषि तेजोऽन्तरस्य विद्यमानत्वात्।।६।।

ननु पेचकादीनां चक्षुःस्थं तेज उद्भूतरूपमनुद्भूतरूपं वा? यद्यद्भूतरूपं तदान्धकारे पर्यटन्मार्जारादिनयनगतस्य तेजसोऽस्मदादि घटादिचाक्षुष–साक्षात्कारे कारणता स्यात्। प्रदीपादिवत्। अथानुद्भूतरूपमिति चेन्न। नयनातिरिक्तस्य तेजस उद्भूतरूपत्वात्।।७।।

ननु यदि चाक्षुषसाक्षात्कारे आलोकस्य कारणता न स्यात्, तर्ह्यन्ध–कारवति गेहे घटसंशयानन्तरं तन्निश्चयार्थं प्रदीपाद्युपादानमनर्थकं स्यादिति चेन्न। प्रतिबन्धकापनयनार्थं तदुपादानमिति चेत्तर्हि तद्द्वारा तस्य तत्र कारणता स्यात्, इति चेन्न। कुड्याद्यावरणाभिघातस्य मुसलादेश्च घट–चाक्षुषसाक्षात्कारे करणताप्रसङ्गात्। तस्मान्न तत्र यथालोकस्य कारणत्वं तथोद्भूतरूपवत्त्वसन्निकर्षयोरपि।।८।।

तथा च प्रमाकरणं प्रमाणमिति प्रमाणलक्षणमविचारितरमणीयमेव।।९।।

किञ्च सन्निकर्षो नाम सम्बन्धः। स च कथं घटते? इन्द्रियस्य मुखदेशे विद्यमानत्वात्, अर्थस्यान्यत्रविद्यमानत्वात्। अथ नयनं न गोलकरूपं, किन्तु तेजोरूपमतस्तद्रश्मीनां विषयेषु सम्बन्धः सम्पनीपद्यत इति चेत्तस्य तेजोरूपत्वे प्रमाणाभावात्। न च प्रमाणाभाव इति वाच्यम्। तस्य तेजो–रूपत्वेऽनुमानस्य विद्यामानत्वात्।।९।।

तथाहि–चक्षुस्तैजसं रूपादीनां मध्ये रूपस्यैवाभिव्यञ्जकत्वात्, प्रदीपवत्, इति तैजसत्वसिद्धिः, इति चेन्न।

हेतोः सन्निकर्षे व्यभिचारात्।।१०।।

किञ्च तत्तेजः किमुद्भूतरूपमनुद्भूतरूपं वा। न तावदाद्यः पक्षः। चक्षुष्यनुपलम्भात्। नापि द्वितीयः। अर्थप्रकाशकत्वाभावप्रसङ्गात्।

सर्वत्रो–द्भूतरूपस्यार्थप्रकाशकत्वदर्शनात्। ततो नयनमर्थप्रकाशकं न भवत्यनुद्–भूतरूपत्वात्। तप्तवारिस्थतेजोवदित्यपि न सम्यक्, हेतो सोपाधिकत्वात्। न च पक्षेतरत्वमुपाधिरिति वाच्यम्, सकलानुमानोच्छेदप्रसङ्गात्।।११।।

चाक्षुषज्ञानजनकत्वाभावः, उपाधिरिति चेन्न। तत्र प्रमाणाभावात्। न चायं हेतुः सोपाधिकः। साध्यं साधकत्वादित्यनुमानं प्रमाणमस्तीति वाच्यम्। हेत्वोरनुकूलतर्काभावेन व्यभिचारात्।।१२।।

ननु यत्रानुकूलतर्काभावस्तत्रावश्यमुपाधिरस्तीति व्यभिचारः, इति चेन्न। तत्र प्रमाणाभावात्।।१३।।

किञ्च, यत्रानुकूलतर्काभावः तत्रोपाधेर्व्यापकत्वं वा करणत्वं वा, उपजीव्यत्वं वा? न तावदाद्यः पक्षः। तस्य व्यापकभावे विनिगमकाभावात्। नापि द्वितीयस्तृतीयः। तत एव तस्माद्धेतोरप्रयोजकत्वेऽनुकूलतर्काभावः कारणं नोपाधिः, परपरिकल्पितस्तस्य तुच्छत्वात्। तथा च प्रकृतानुमानं निर्दुष्टमेव, अनुकूलतर्कस्य विद्यमानत्वादिति।।१४।।

अथ कारकसाकल्यं प्रमाणम् इत्यपरे। तेऽप्येवं प्रष्टव्याः, सकलानि कारणानि साकल्यं वा तद्वैशिष्ट्यं वा। न तावदाद्यः पक्षः, सकलकारकाणां करणत्वप्रसङ्गः। तदा स कर्त्रादिकारकव्यवहारविलोपापत्तिः। नापि तद्वैशिष्ट्यं तस्यासम्भवात्। तथाहि–वैशिष्ट्यं नाम सम्बन्धः। स च संयोगो वा, समवायो वा तत्स्वरूपं वा, तद्धर्मो वा? न तावत्संयोगः, आत्मनः कर्तुर्घटरूपकर्मणा संयोगाभावात्। आत्मनः स्वशरीरे विद्यमानत्वात्। घटादेश्च दूरदेशे विद्यमानत्वात्।।१५।।

अथात्मनो व्यापकत्वात्संयोगः सम्भवतीति चेत्तर्हि, तत्र किं प्रमाणम्? आत्मा व्यापकः नित्येन्द्रियग्राह्यविशेषगुणाश्रयत्वादाकाशवदिति चेन्न, अहमत्रास्मीति प्रत्ययेनानुमानबाधात्। न चाहमत्रास्मीति प्रत्ययेनानुमानबाध इति वाच्यम्। अहमत्रास्मीति प्रत्ययस्योभयवादिसिद्धत्वात्।।१६।।

ननूभयवादिसिद्धत्वेऽप्यहमत्रास्मीति प्रत्ययो भ्रमरूप इति चेन्न। भ्रान्तित्वे बाधकाभावात्। यद्यपि नाहमत्रास्मीति प्रत्ययो नास्ति, तथापि युक्तिबाधोऽस्त्येवेति चेन्न। युक्तिस्तावदात्मनो व्यापकत्वसाधकानुमानम्, तत्राद्यापि विवादात्। अतस्तेन तस्य कथं बाधः।।१७।।

ननु देशान्तरगतमण्याद्यगमनं देवदत्तस्य तावदनुभवसिद्धम्। आगमनं हि कार्यम्। तच्च कारणेन विनानुपपद्यमानं सत्कारणमाक्षिपति।।१८।।

तथा च कार्यदेशे नियमेन कारणमस्तीति चेद्वाच्यम्–तत्किं कारणम–दृष्टाख्यम्। अदृष्टस्य गुणरूपत्वेन गुणिनं विहाय गुणस्यावस्थानासम्भ–वात्। अतस्तत्रापि गुण्यात्मास्त्येवेति आत्मनो व्यापकत्वसिद्धिः।।१९।।

कार्यदेशे सन्निहितमेव सर्वं कारणमिति न नियमः। मन्त्रादेर्देशान्तर–स्थाङ्गनाद्याकर्षणात्मकं कार्यं प्रति कारणत्वेनोपालम्भात्। ततः शरीरावच्छिन्नात्मनि प्रवर्तमानात्तादृशाददृष्टादेव देशान्तरस्थमण्याद्युपसर्पण –सिद्धेर्नात्मनो व्यापकत्वमिति।।२०।।

किञ्चात्मा यदि व्यापकः स्यात्, गमनादिमान्न स्यात्। तथा चात्मा–व्यापकः देशाद्देशान्तरप्राप्तेर्बाणादिवत्।।२१।।

नापि समवायः। समवायस्य पञ्चसु स्थलेषु सम्भवात्।।२२।।

नापि स्वरूपसम्बन्धः। तत्र तत्स्वरूपाणां सम्बन्धत्वाघटनात्। सम्बन्धो हि सम्बन्धिभ्यां भिन्नस्तवाश्रितश्चैकश्चेति सम्बन्धस्य लक्षणम्। तच्च प्रकृते न सम्पनिपद्यते। तत्स्वरूपसम्बन्धो गगनारविन्दरूप एवेति।।२३।।

नापि वैशिष्ट्यं धर्मः, विकल्पासहत्वात्। तथाहि–स च कारकेभ्यो भिन्नोऽभिन्नो वा? यद्यभिन्नः कारकमात्रं धर्ममात्रं वा स्यात्। यदि भिन्नस्तर्हि सम्बन्धासिद्धिः। न च सम्बन्धासिद्धिरिति वाच्यम्। संयोगादि–सम्बन्धस्य सम्भवात्।।२४।।

ननु स च सम्बन्धः संयोगो वा समवायो वान्यो वा? न तावदाद्यः पक्षः द्रव्ययोरेव संयोगात्। नापि द्वितीयः। गुणादिव्यतिरिक्तत्वात्।।२५।।

न च वैशिष्ट्यं धर्मो गुण इति वाच्यम्। चतुर्विंशतिगुणेष्वनन्तर्भावात्। नापि तस्य कर्मत्वं तस्यानन्तर्भावात्। न च जातिः, तल्लक्षणाभावात्। नैव विशेषः। नियमेन नित्यद्रव्येष्वप्रवृत्तेः। न हि समवायः। असम्बन्धरूपत्वात्। अथ स्वरूपसम्बन्ध इति चेन्न। पूर्वोक्तदोषकवलितत्वात्। ततो न कारक–साकल्यं प्रमाणम्।।२६।।

इन्द्रियप्रवृत्तिः प्रमाणम् इति सांख्याः। तेऽपि न परीक्षकाः विचारानभि–मुखत्वात्। तथाहि–इन्द्रियस्य विषयेषु प्रवृत्तिर्हीन्द्रियवृत्तिः, सम्बन्ध इति यावत्। स च न सम्भवति। तयोर्भिन्नदेशप्रवृत्तित्वात्।।२७।।

किञ्च, इन्द्रियेभ्यो वृत्तिर्व्यतिरिक्ता वाव्यतिरिक्ता वा घटते। तेभ्यो यद्यभिन्ना तदा श्रोत्रादिमात्रमेव सा। तच्च सुप्ताद्यवस्थायामप्यस्तीति तदाप्यर्थपरिछित्तिप्रसक्तेः सुप्तादिव्यवहारोच्छेदः। अथ व्यतिरिक्तासौ तर्हि तस्येयमिति व्यपदेशासिद्धिः।।२८।।

न च सम्बन्धात्तस्येयमिति व्यपदेशः सिद्ध्यतीति वाच्यम्। कोऽसौ सम्बन्धः संयोगः समवायो वा। न तावत्संयोगः। प्रवृत्तेरद्रव्यत्वात्। नापि समवायः। गुणगुणिनोरत्यन्तं भिन्नयोः समवायासम्भवात्।।२९।।

किञ्च, वीणानादाकर्णनव्यासक्तस्य पुरुषस्य रूपादिविषये चक्षुषः प्रवृत्तावपि रूपादिप्रत्ययानुत्पत्तेर्नेन्द्रियवृत्तिः प्रमाणम्।।३०।।

अर्थतथात्वप्रकाशको ज्ञातृव्यापारः प्रमाणम् **इति प्रभाकर मतम्। तदपि न, विचाराक्षमत्वात्। तथाहि–ज्ञातृव्यापारः किं ज्ञानरूपोऽज्ञानरूपो वा? न तावदाद्यः पक्षोऽनङ्गीकारात्। अज्ञानरूपः सः प्रवृत्तिरूपो वान्यो वा? न प्रवृत्तिरूपस्तस्यार्थप्रकाशकताघटनात्। घटने वान्धकारवति प्रदेशे प्रवर्तमानस्यार्थप्रतिपत्तिः स्यात्। नान्योऽनिर्वचनात्।।३१।।**

अथ जानातीति क्रिया ज्ञातृव्यापार इत्यभिधीयते। स च बोधरूपो वाबोध –रूपो वा? बोधरूपत्वे प्रमातृवत्प्रमाणान्तरगम्यता न स्यात्। अबोधरूपता तु व्यापकस्यायुक्ता। चिद्रूपस्य ज्ञातुरचिद्रूपस्य व्यापारायोगात्। तथा च न च ज्ञानरूप एव युक्तः।।३२।।

किञ्चासौ ज्ञातृव्यापारो नित्योऽनित्यो वा? न तावन्नित्यः। अन्धादीना–मप्यर्थदर्शनप्रसङ्गात्। सुप्तादिव्यवहाराभावः। सर्वस्य सर्वज्ञत्वप्रसङ्गः। कारणान्वेषणवैयर्थ्यं च स्यात्। अथानित्यः सोऽप्यजन्यो जन्यो वा। न तावदजन्यः प्रागभाववत्। अनादित्वप्रसङ्गात्।।३३।।

न च व्यापारस्य कारकजन्यत्वमुररीक्रियत इति वाच्यम्। अनवस्थानात्। तथा हि–व्यापारजनने प्रवर्तमानानि कारकाणि व्यापारान्तरसापेक्षाणि न वा। तत्राद्यपक्षेऽनवस्था, व्यापारान्तरसापेक्षैस्तैर्जननात्। व्यापारान्तरनिर–पेक्षाणां तज्जनकत्वे फलजनकत्वमेवास्तु किमदृष्टव्यापारपरिकल्पना–प्रयासेन।।३४।।

व्यापारस्तथापि प्रकृतकार्यः। असौ व्यापारान्तरसापेक्षो न वा? न तावत्सापेक्षः। अपरापरव्यापारान्तरापेक्षायामेवोपक्षीणशक्तिकत्वेन प्रकृत–कार्यजनकत्वाभावप्रसङ्गात्। व्यापारान्तरनिरपेक्षस्य तज्जनकत्वे कारकाणा –मपि तथा तदस्तु , विशेषाभावात्।।३५।।

किञ्च ज्ञातुव्यापारः किमात्मनो भिन्नो वाभिन्नो वा? भिन्नश्चेत्तस्येति व्यपदेशासिद्धिः। अभिन्नश्चेत्तादात्म्येन व्यापारेणोक्तः स्यात्। ततो न प्रमाणमर्थतथात्वप्रकाशको ज्ञातृव्यापार इति।।३६।।

अनधिगतार्थाधिगन्तृत्वं प्रमाणम् **इति भाट्टमते प्रमाणलक्षणम्। तन्न। स्मृतेरप्रामाण्यप्रङ्गात्। इष्टापत्तिरिति चेन्न। स्मृतिप्रामाण्यस्य पूर्वं व्यवस्था–पितत्वात्।।३७।।**

किञ्चेदं लक्षणमव्याप्तम्। उपमाने प्रमाणेऽनधिगतार्थाधिगन्तृत्वा–भावात्। न च संशयातिरिक्तमिदं लक्षणमिति वाच्यम्। संशयस्याधिगता–र्थाधिगन्तृत्वात्।।३८।।

ननु संशयविषय एको वा द्वयं वा? तच्च तत्र पूर्वं यद्यवगतं तदा विशेवत्तयावगतं न वा? न तावदाद्यः पक्षः। निश्चिते संशयायोगात्। नापि द्वितीयः। संशयादावतिव्याप्तेः। अथ एकत्र वक्रकोटरादिमत्तया स्थाणुर्ज्ञातः। अपरत्र शिरःपाण्यादिमत्तया पुरुषो ज्ञातः। तत्र स्थाणौ पुरुषे वा समवायान्तरविशेषापरिज्ञानदशायां संशयः सम्भवति।।३९।।

तथा च नातिव्याप्तिः। अधिमतार्थाधिगन्तृत्वात्। न च प्राथमिकघट–ज्ञानातिरिक्तघटज्ञानं प्रमाणं न स्यात्। अधिगतार्थाधिगन्तृत्वादिति वाच्यम्। समयभेदादर्थभेदसिद्धेः। प्रकृतेऽपि समयभेदाद्विषयभेदस्य सम्भवादति–व्याप्तिः तत्र तदवस्थैव।

ततोऽनधिगतार्थाधिगन्तृ प्रमाणमिति मन्दमेव।।४०।।

अविसंवादिज्ञानं सौगतीयं प्रमाणम्। तदपि न। परप्रतिपादितदूषणगण–प्रसङ्गात्। तथाहि–अविसंवादित्वं ज्ञाने ह्युत्तरकाले ज्ञानान्तरेणाबाध्यत्वम्। तस्य कदाचिद्भ्रमेऽपि सम्भवात्। तत्रापि प्रामाण्यप्रसङ्गात्।।४१।।

किञ्चाविसंवादित्वं विसंवादित्वाभावः। विसंवादित्वं बाध्यत्वम्। तच्च सतो न सम्भवति। स्थितिक्षणस्य त्वयानङ्गीकारात्। नाप्यसतोऽसम्भवात्। तथा चाप्रसिद्धस्य विसंवादित्वस्याभावः कथं निरूपणीयोऽतिप्रसङ्गात्। ततोऽविसंवादिविज्ञानं प्रमाणमिति प्रमाणलक्षणमविचारितरमणीयमेव।।४२।।

**इति शान्तिवर्णिविरचितायां प्रमेयकण्ठिकायां द्वितीयस्तबकः।।**

श्री शान्तिवर्णिविरचिता

# प्रमेयकण्ठिका

## तृतीय स्तबकः

अथ ज्ञप्तौ तत्प्रमाणस्य प्रामाण्यं स्वतः परतश्च, सर्वथा प्रामाण्यस्य स्वतस्त्वपरतस्त्वयोर्बाधकसद्भावात्। तथाहि–प्रमाणस्य प्रामाण्यं स्वाश्रयग्राह्यमिति मीमांसकाः। तत्र प्रामाण्यं स्वाश्रयग्राहकेणानुमानेन गृह्यत इति भाट्टाः। स्वाश्रयग्राहकेण स्वेन गृह्यत इति प्राभाकराः। स्वाश्रयग्राहकेणाव्यवसायेन गृह्यत इति मुरारिमिश्राः।।१।।

तथा च प्रयोग :– ज्ञानप्रामाण्यं स्वाश्रयग्राहकग्राह्यं भवितुमर्हति। अबाधितप्रत्ययधर्मत्वात्। यथा ज्ञानत्वमिति मीमांसकत्रितय–साधारणानुमानात् प्रामाण्यस्य स्वतस्त्वसिद्धिः।।२।।

यदि प्रामाण्यं परतो ज्ञायते, तदनुमापकलिङ्गपक्षव्याप्त्यादिज्ञानेषु स्वस्वविषयनिश्चयार्थं प्रामाण्यस्य परतो ज्ञेयत्वे फलमुखी कारणमुखी चानवस्था स्यादिति न प्रमाणं परतो ज्ञायते, इति परिशेषादपि स्वतः प्रामाण्यग्रहः।।३।।

ननु प्रामाण्यस्य स्वतो ग्रहेऽनभ्यासदशोत्पन्नज्ञाने तत्संशयो न स्यात्। ज्ञानग्रहे प्रामाण्यनिश्चयात्। अनिश्चये वा न स्वतः प्रामाण्यग्रह इति चेत्, पीतः शङ्खः, आदर्शे मुखमित्यादि भ्रमो विशेषदर्शनेऽपि यथा दोषान्तराज्जायते। तथा निश्चिते प्रामाण्ये दोषान्तरात्तत्संशय इति चेत्, न, तद्वदेवात्रापि प्रवृत्तिप्रसङ्गात्। साक्षात्कारविशेषदर्शनं साक्षात्कारी भ्रमविरोधिदिङ्मोहादौ तथादर्शनात्। तच्च न पित्तादिना न प्रतिबन्धात्। न च जात्या कश्चिद्दोषः। न च प्रामाण्यसंशयाद्विषये संशयवत् प्रामाण्यज्ञाने प्रामाण्यसंशय इति वाच्यम्। प्रामाण्यज्ञानेऽपि स्वतः प्रामाण्यग्रहे संशया–नुपपत्तेः। तस्मादनभ्यासदशापन्नज्ञाने प्रामाण्यं परतो ज्ञायते। सांशयिकत्वादप्रामाण्यवत्। ततो न सर्वथा प्रामाण्यस्य स्वतस्त्वं सिद्धम्।।४।।

परतस्त्वं तु प्रामाण्यस्य ज्ञानग्राहकातिरिक्तग्राह्यत्वम्। ज्ञानं मनसा ग्राह्यम्। तद्गतं प्रामाण्यं पुनरनुमानग्राह्यमिति नैयायिकाः। तथा च प्रयोगः–इदं जलज्ञानं प्रमाणम्। समर्थप्रवृत्तिजनकत्वात्। यन्नैवं तन्नैवं यथाप्रमाणम्, इत्यस्मादनुमानात्परतस्त्वसिद्धिः।।५।।

ननु गृहीतप्रामाण्यं ज्ञानम्। न परप्रामाण्यं निश्चयरूपम्। अनवस्था–वतारात्। नापि ज्ञायमानप्रामाण्यं स्वतः प्रामाण्यग्रहापत्तेरतो गृहीतप्रामाण्यमेव ज्ञानम्। परप्रामाण्यनिश्चयरूपमास्थेयम्। तथा सति व्यवसायोपगृहीतप्रामाण्य एव स्वविषयं निश्चाययतु। किं विषयनिश्चयार्थं तत्प्रामाण्यग्रहेण।।६।।

अथ व्यवसायस्याप्रामाण्यदर्शनान्न तन्मात्रादर्थनिश्चयस्तर्हि प्रामाण्यानुमितेरप्यप्रामाण्यदर्शनान्न भवतोऽपि प्रामाण्यनिश्चय इति चेन्न ब्रूमो ज्ञानप्रामाण्यनिश्चयादेवार्थनिश्चय इति। किन्तु यत्राप्रामाणता नास्ति स्वग्रामतटाकादिज्ञानेषु व्यवसाय एवार्थनिश्चय इति। तत एव प्रवृत्ति–र्निष्कम्पा भवेत्। साधूक्तम्। तत्राप्रामाण्यशङ्का कुतो न भवेत्। प्रामाण्यस्य निश्चिततत्वात्। तत्र प्रामाण्यनिश्चयः परतो वा स्वतो वा स्यात्। न च परतः प्रामाण्यशङ्काभावात्। यावदाशङ्कं प्रामाण्यानुस्मरणम् () इत्युक्तत्वात्। नापि स्वतः, अपसिद्धान्तापातात्। तस्मान्न सर्वथाप्रामाण्यस्य स्वतस्त्वं परतस्त्वं वा सिद्धम्। किं तर्हि, अभ्यासदशायां स्वतस्त्वमनभ्यासदशायां परतस्त्वं प्रामाण्यस्योरीकर्त्तव्यम्।।७।।

ननु परतस्त्वे प्रामाण्यस्यानवस्थाप्रसङ्ग इति चेन्न। विषयान्तरसञ्चारात्। स्वयं सिद्धप्रामाण्याद्वेदनात्पूर्वस्य तथाभावसिद्धश्चेति प्रामाण्यज्ञप्ति–वादः।।८।।

अथोत्पद्यते प्रमा परत एव न तु स्वतो विज्ञानसामग्रीमात्रात्। तथाहि– अनित्या प्रमा प्रमाकरणविजातीयकारणजन्या। प्रमाविजातीयकार्यत्वाद् घटवदिति प्रमायाः परतस्त्वसिद्धिरिति चेन्न। दोषाभावेन सिद्धसाधनात्। तथा चानित्या प्रमा आगन्तुकभावसापेक्षज्ञानसामग्रीजन्या न प्रामाण्यत्वात् घटवत्।।९।।

ननु लाघवतर्कसहकारिणा(णी) भावरूपमेव प्रमायाः कारणमनुमितिर्विषयीकरोति। न त्वभावात्मकदोषाभावरूपं कारणं गौरवात्।

तस्मात्प्रमां प्रति गुणो हेतुरप्रमां प्रति दोषो हेतुः। अन्यथाप्रमां प्रति गुणाभाव एव हेतुः स्याद्दोषोऽपि तत्र निदानं न भवेत्। विनिगमकाभावात्। तस्मादनित्यप्रमेत्वादिसाधनमप्रयोजकम्। अनुकूलतर्काभावात्।।१०।।

अथ प्रमां भ्रमं च कुर्वती ज्ञानहेतुस्तोमे किं मण्डूकवशाञ्जनदोषाध्वंशोरगभ्रमः। तदभावात्प्रमेत्यन्वयव्यतिरेकाभ्यां भ्रमं प्रति दोषस्य कारणताकल्पनात्। तदभाव एव प्रमां प्रति कारणं कल्प्यते। न त्वतिरिक्तो गुणः, गौरवात्। तथा च सिद्धसाधनं तदवस्थमेव। अत एव न प्रतिबन्धिरपि दोषस्यान्वयव्यतिरेकाभ्यां कारणताकल्पनात्। साधनं तु नाप्रयोजकं साधनस्य साध्यव्याप्यत्वात्।।११।।

ननु विशेषज्ञानलक्षणगुणाभावे सति न संशयविपर्ययोत्तरप्रत्यक्षप्रमा। तस्मिन् सति सा इत्यन्वयव्यतिरेकाभ्यां तां प्रत्यपि तस्य कारणत्वं गृहीतम्। अतः क्वार्थातरम्। मीमांसकीयसाधने चाप्रयोजकत्वं तदवस्थमेव। साध्यसाधनयोर्व्याप्तेरभावात्।।१२।।

ननु शाब्दप्रमां प्रति भ्रमप्रमादविप्रलिप्साकरणापाटवात्मकदोषचतुष्टयाभावस्य कारणत्वं क्लृप्तम्। तथा सर्वत्रापि दोषाभावस्य कारणत्वं युक्तम्। अथ शाब्दप्रमां प्रत्यपि यथार्थवाक्यार्थज्ञानस्यैव गुणस्य कारणता क्लृप्तदोषचतुष्टयाभावापेक्षया तस्य लघुत्वात्। इत्युत्पत्तौ प्रमायाः परतस्त्वसिद्धिरिति प्रामाणोत्पत्तिवादः।।१३।।

अथ किं तत्प्रामाण्यस्य लक्षणाम्, सत्यत्वमिति चेन्न। घटादिसाधारण्यात्। सुनिश्चितासम्भवद्बाधकज्ञानत्वं प्रामाण्यलक्षणमिति चेन्न। धारावाहिकज्ञानेऽतिव्याप्तिरिति चेन्न। गृहीतग्राहिज्ञानस्यापि बाधकसद्भावात्। तथाहि—गृहीतग्राहिधारावाहिज्ञानमप्रमाणम्। गृहीतग्राहिप्रत्ययत्वात्। यन्नैवं तन्नैवम्। यथा प्रमाणम्। ततस्तत्र तल्लक्षणं नातिव्याप्तम्। इति सुनिश्चितासम्भवद्बाधकज्ञानत्वं वा स्वापूर्वार्थव्यवसायायात्मकज्ञानत्वं वा प्रामाण्यस्य लक्षणम्।।१४।।

अन्ये तु तद्वति तत्प्रकारकज्ञानत्वं प्रामाण्यलक्षणमाचक्षते। तदविचारितरमणीयमिति सर्वं सुस्थम्।।१५।।

## इति शान्तिवर्णिविरचितायां प्रमेयकण्ठिकायां तृतीयस्तबकः।।

श्री शान्तिवर्णिविरचिता

# प्रमेयकण्ठिका

## चतुर्थ स्तबकः

अथ तत्प्रमाणस्य सप्तभङ्ग्यात्मकः पदार्थो विषयः। तथाप्रतीतेः। नन्वेकान्ततस्तत्सर्वं भावरूपमिति चेन्न। सर्वस्य सर्वात्मकत्वप्रसङ्गात्। न च तद्धर्मस्यासाधारणस्य विद्यमानत्वान्न सर्वस्य सर्वात्मकत्वमिति वाच्यम्। असाधारणधर्मस्य साधारणधर्माभावरूपत्वात्। तथा चासाधारणमिच्छता भावैकान्तवादिनाप्यवश्यमभावोऽङ्गीकर्त्तव्यः।

ततः स्यादस्तीति वक्तव्यम्।।१।।

अथ सर्वथाभावरूपमेव जगदिति चेन्न। घटः सन् पटः सन्निति सद्ग्राहकस्य प्रत्यक्षप्रमाणस्य सद्भावात्सर्वथाभाव इत्यत्र प्रमाणाभावाच्च। ततः स्यान्नास्तीति वक्तव्यम्।।२।।

तथा न सर्वथा भावाभावात्मकश्च पदार्थस्तदंशेन जात्यन्तरस्यापि प्रतीतेः पानकवत्। ततः स्यादस्तिनास्तीति वक्तव्यम्।।३।।

ननु मास्तु सर्वथास्तित्वं नास्तित्वं तदुभयं वा। अनेकदोषकवलितत्वात्। किन्तु सर्वथा सर्वमवाच्यमिति चेन्न। सर्वथा वस्तुनोऽवाच्यत्वेऽवाच्यमि-त्युक्तेरसम्भवात्। किञ्चानभिलाप्यत्वे वस्तुनः केवलं जगता मूकत्वं स्याद्विधिप्रतिषेधव्यवहारायोगात्। ततः स्यादवक्तव्यमिति वक्तव्यम्।।४।।

अथेदं सदिति सर्वं सामान्यरूपमिति चेन्न। तस्यावक्तव्यत्वात्। तत्र प्रमाणाभावाच्च। ततः सदवक्तव्यमेवेति वक्तव्यम्।।५।।

ननु मा भवतु सत्तासामान्यमन्यापोहरूपत्वं सामान्यं भवत्विति चेन्न। तस्याप्यवक्तव्यत्वात्। तस्य व्यावृत्तिरूपत्वेन सामान्यरूपताघटनाच्च। ततोऽसदवक्तव्यमिति वक्तव्यम्।।६।।

अथ सामान्यविशेषौ परस्परमत्यन्तभिन्नौ स्यातामिति चेन्न। तयोरप्यवक्तव्यत्वात्। सर्वथा सामान्यविशेषयोर्भिन्नयोः प्रमाणबाधितत्त्वा-च्च। ततः सदसदवक्तव्यमेवेति वक्तव्यम्। परमत्तापेक्षया त्वेवं भङ्गाना-मुद्देशः।।७।।

स्वमतापेक्षया त्वेवमुद्देशः। तथाहि-एकस्मिन्वस्तुनि स्यात्सत्त्वं स्वरूपादि -चतुष्टयापेक्षया। स्यादसत्त्वं पररूपादिचतुष्टयापेक्षया। स्यात्सदसत्त्वं स्वपररूपादिचतुष्टयापेक्षया। स्यादवक्तव्यत्वं स्वपररूपादिचतुष्टयापेक्षया सह वक्तुमशक्तेः। स्यात्सदवक्तव्यत्वं स्वरूपादिचतुष्टयापेक्षत्वे सति सह वक्तुमशक्तेः। स्यादसदवक्तव्यत्वं पररूपादिचतुष्टयापेक्षत्वे सति सह वक्तुमशक्तेः। स्यात्सदवक्तव्यत्वं स्वपररूपादिचतुष्टयापेक्षत्वे सति सह वक्तुमशक्तेरिति भङ्गसप्तकमुपपन्नम्।।८।।

ननु सत्त्वासत्त्वयोर्विरुद्धधर्मयोः कथमेकत्रावस्थितिरिति चेन्न। तयोरविरुद्धत्वात्। तथाहि-विरोधो ह्यनुपलम्भसाध्यः। स च प्रकृते न सम्भवति। तयोरेकत्र प्रतीतेः।।९।।

ननु घटः सन् पटः सन्निति घटादौ सत्त्वमेव प्रतीयते, नत्वसत्त्वमिति चेन्न। गौणतयासत्त्वस्यापि प्रतीतेः। किञ्च विरोधः किं सहानवस्थानलक्षणो वा परस्परपरिहारस्थितिलक्षणो वा वध्यघातकभावो वा। न तावदाद्यः पक्षः सत्त्वासत्त्वयोरेकत्रोपलब्धेः। द्वितीयस्तु सम्भवतोः सत्त्वासत्त्वयोरेव स्यात्। एकत्र मातुलिङ्गे रूपरसयोरिव। नापि तृतीयः। तयोः समानबलत्वात्। किञ्चैकावच्छेदेनापि घटतदभावयोरेकत्राविरोधेनावस्थितेः परैरप्यङ्गीकृत-त्वात् कथं विरोधाख्यं दूषणं वरीवर्तीति तयोर्न विरोधः।।१०।।

ननु मा भवतु विरोधः संशयादिलक्षणं तु सं सम्पनिपद्यते दूषणम्। तथाहि-केन खलु स्वरूपेण घटादीनां सत्त्वं केन चासत्त्वमिति संशयः। तथा सत्त्वस्यान्यदधिकरणम्। असत्त्वस्यान्यदधिकरणमिति वैयधिकरण्यम्। तथा येन स्वभावेनार्थस्य सत्त्वस्वभावत्वं तेनासत्त्वस्वभावस्याप्रसङ्गः। येनासत्त्वभावत्वं तेन सत्त्वस्वभावस्यापि, इति सङ्करः। सर्वेषां युगपत्प्राप्तिः सङ्करः इत्यभिधानात्। तथा येन स्वभावेन वस्तुनः सत्त्वं तेनासत्त्वं प्राप्नोति। येन चासत्त्वं तेन सत्त्वमिति व्यतिकरः। परस्परं विषयगमनं व्यतिकरः इति प्रसिद्धेः।

तथा येन रूपेण सत्त्वं तेन कथंचिदसत्त्वम्। येन चासत्त्वं तेनापि कथञ्चित्सत्त्वमित्यनवस्था। अतोऽप्रतिपत्तिस्ततोऽभाव इति। तत्र न तावत्संशयः। वस्तुनो भेदाभेदात्मकत्वे प्रमाणसिद्धे संशयस्यासम्भवात्। सत्त्वासत्त्वाप्रतीतौ कि संशयो युक्तः। क्वचित्स्थाणुत्वपुरुषत्वाप्रतीतौ। कथमसौ चलिता प्रतिपत्तिः संशयः। न चेयं प्रतिपत्तिस्तथा। नापि वैयधिकरण्यम्। निर्बाधबोधे सत्त्वासत्त्वयोरेकाधारतया प्रतीयमानत्वात्। न च सङ्करव्यतिकरौ स्वरूपेणैवार्थे तयोः प्रतीतेः। नाप्यनवस्था धर्मिणो ह्येकरूपत्वं न धर्माणां, ततः कथमनवस्था। अभावदोषस्तु दूरोत्सारित एवाशेषप्राणिनामनेकान्तात्मकार्थस्यानुभवसम्भवात्। एवं स्यादेकं द्रव्या–पेक्षया, स्यादनेकं पर्यायापेक्षया, इत्यादि योज्यम्।।११।।

अथैकत्वानेकत्वयोर्विरोधात्कथमेकस्यैकत्वानेकत्वमिति चेन्न। प्रतीय–मानयोस्तयोर्विरोधासम्भवात्।।१२।।

ननु न प्रतीयते विरोधात्तदिति चेन्न। विरोधस्यानुपलम्भसाध्यत्वात्। प्रकृते तु अनुपलम्भाभावाद्विरोधो नास्ति। येन विरोधान्न प्रतीयत इति वक्तुमुद्यतोऽसि।।१३।।

किञ्च कुम्भोऽयमिति कुम्भज्ञानं कुम्भांशे सप्रकारकं कुम्भत्वांशे निष्प्रकारकमित्येकज्ञाने सप्रकारकनिष्प्रकारकत्वयोः परैरप्यङ्गीकृतत्वात् कुतो विरोधोऽवतिष्ठते। ततो न विरोधः। संशयादिदोषपरिहारः पूर्ववदेव। एवं सर्वं स्यान्नित्यं द्रव्यापेक्षया, स्यादनित्यं पर्यायापेक्षया।

इत्यादि योज्यम्।।१४।।

नन्वात्मनः कथं नित्यत्वं नित्यत्वे प्रमाणासद्भावात्। तद्धि प्रत्यक्षं वानुमानं वा? न तावदाद्यः पक्षः। तस्य नीरूपत्वात्। मनसा ग्राह्यत्वेऽपि तन्नित्यत्वाग्रहात्। आत्मा नित्यः, निरंशत्वाद्, गगनवदित्यनुमानं प्रमाणमिति चेन्न। पाकजरूपेण व्यभिचारात्। दत्तेऽपि रूपव्यतिरिक्तत्वे सतीति विशेषणे कर्मणा व्यभिचारस्तदवस्थ एव। अथ निरंशद्रव्यत्वमेव साधनमिति चेन्न। विशेषणासिद्धत्वात्।।१५।।

नन्वात्मा निरंशः, नित्यत्वादित्यनुमानान्निरंशत्वसिद्धिरिति चेन्न। सर्वथा नित्यत्वस्य स्वरूपासिद्धत्वात्। नित्यत्वे सिद्धे तस्य निरंशत्वसिद्धिः निरंशत्वे सिद्धे नित्यत्वसिद्धिरित्यन्यान्याश्रयाच्च।।१६।।

किञ्च कुण्डली दण्डी नेत्यत्र विशिष्टाभावः प्रतीयते। विशिष्टत्वं च विशेषणविशेष्यतदुभयसम्बन्धातिरिक्तं नास्ति। तथा च विशेषणाभाव–वद्विशेष्यस्याप्यभावः सिद्धस्तदा विशेष्यो नित्य एव। य एव दण्डविशिष्ट आसीत्स एवेदानीं कुण्डलविशिष्टो दृश्यत इति प्रत्यभिज्ञानबलान्नित्यो विशेष्यपदार्थ इति नित्यानित्यत्वमेकस्य परैरङ्गीकर्त्तव्यम्। तथा च प्रयोगः– आत्मा नित्यानित्यात्मकः सत्त्वात्। यन्नैवं तन्नैवम्। यथा गननकोकनद–मिति।।१७।।

नन्वेकस्य नित्यानित्यत्वे विरोधादिदूषणमिति चेन्न। विरोधादेः पूर्ववत् परिहर्तव्यत्वात्। ततो न विरोधादिदूषणम्। एवं सामान्यविशेषात्मकं सकलं परैरभ्युपगन्तव्यम्। घटत्ववत्, ततो न विरोधादिदूषणावकाशः।।१८।।

ननु वस्तुन्यनेकान्तात्मकत्वस्यासम्भवः, प्रमाणाभावादिति चेन्न। सर्वमनेकान्तात्मकं तत्त्वात्, इत्यनुमानादनेकान्तात्वकत्वस्य सिद्धेः।।१९।।

अथ सप्तभङ्गी प्रमाणं वा प्रमाणविषयो वा? न तावदाद्यः पक्षः। घटादेरपि प्रमाणत्वं स्यात्तस्य सप्तभङ्गात्मकत्वात्। द्वितीयपक्षे तु प्रमाणस्यापि प्रमेयत्वं स्यात्तस्यापि सप्तभङ्गात्मकत्वात्।।२०।।

ननु प्रमाणस्य प्रमेयत्वं स्यादिति यदुक्तं तदिष्टमेव तुलायां प्रमाणप्रमेय–व्यवहारादिति।।२१।।

**इति शान्तिवर्णिविरचितायां प्रमेयकण्ठिकायां चतुर्थस्तबकः।।**

श्री शान्तिवर्णिविरचिता

# प्रमेयकण्ठिका

## पञ्चम स्तबकः

अनेकान्तात्मकं वस्तु सर्वं साक्षात्कुर्वन्नेव सर्वज्ञो नेश्वरः। तत्र प्रमाणाभावात्।।१।।

ननु क्षित्यादिकमुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यं कार्यत्वात्। यद्यत्कार्यं तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्ज–न्यम्। यथा कुम्भादिकार्यम्। कार्यं चेदं क्षित्यादिकम्। तस्मादुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यम्। न च कार्यत्वमसिद्धम्। तथाहि–क्षित्यादिकं कार्यम्। सावयवत्वात्। यत्सावयवं तत्कार्यम्। यथा हर्म्यादि। सावयवं चेदम्। तस्मात्कार्यम्।।२।।

ननु सावयवत्वात्कार्यत्वं क्षित्यादेः प्रसाध्यते। तत्र किमिदं सावयवत्वं नाम सहावयवैर्वर्तमानत्वं, तैर्जन्यमानत्वं वा, सावयवमिति बुद्धिविषयत्वं वा? प्रथमपक्षे सामान्यादिना अनेकान्तो गोत्वादिसामान्यं हि सहावयवै–र्वर्तते। न च कार्यम्। द्वितीयपक्षेऽप्यसिद्धो हेतुः। परमाण्वाद्यवयवानां प्रत्यक्षतोऽसिद्धौ क्षित्यादेस्तज्जन्यमानत्वस्याप्यसिद्धेः। प्रत्यक्षानुपलम्भ–साधनश्च कार्यकारणभावः द्व्यणुकं स्वपरिमाणादल्पपरिमाणोपेत–कारणारब्धं कार्यत्वाद्घटवदित्यनुमानात्तत्प्रसिद्धिरित्यप्यसङ्गतम्। चक्रकप्रसङ्गात्। परमाणुप्रसिद्धौ हि क्षित्यादेर्जन्यमानत्वलक्षणसावयव–त्वसिद्धिः। तत्सिद्धौ हि परमाणुप्रसिद्धिरिति महापरिमाणोपेतप्रशिथिलावयव कार्पासपिण्डोपादाने नातिनिविडावयवाल्पपरिमाणोपेतकार्पास पिण्डेना–नेकान्तश्च। बलवत्पुरुषप्रयत्नप्रेरितहस्ताद्यभिघातादवयवक्रियोत्पत्तिरवयव –विभागात्पूर्वसंयोगविनाशान्महाकार्पासपिण्डविनाशोऽल्पकार्पासपिण्डो–त्पादस्तु स्वारम्भकावयवकर्मसंयोगविशेषवशादेव भवतीत्यपि विनाशोत्पाद –प्रक्रियोद्घोषणमात्रं प्रमाणतोऽप्रतीतेः। कार्पासद्रव्यं हि महापरिमाणपिण्डा –कारपरित्यागेनाल्पपरिमाणपिण्डाकारतयोत्पद्यमानं प्रमाणतः प्रतीयते। आशूत्पत्तेर्भेदान्नवधारणात्तथाप्रतीतिरित्यसङ्गतम्। सकलभावानां क्षणिकत्वानुषङ्गात्। सावयवमिति बुद्धिविषयत्वमप्यात्मादिनानैकान्तिकम्। तस्याकार्यत्वेऽपि तत्प्रसिद्धेः। सावयवार्थसंयोगान्निरवयवत्वेऽप्यस्य तद्–बुद्धिविषयत्वमित्यौपचारिकं चेत्तदसमञ्जसम्। तस्य निरवयत्वे व्यापित्व–विरोधात्। परमाणुवत्। तदपि ह्यौपचारिकमेव स्यात्। तदेवं सावयवत्व–सिद्धेः। कथं क्षित्यादेः कार्यत्वसिद्धिः।।३।।

किञ्च पक्षतावच्छेदकं क्षित्यादिकमन्यद्वा। नाद्यः। क्षितित्वाङ्कुरत्वाम्बोधि –त्वादिपक्षतावच्छेदकनिरूपकनिरूपणेनैव पुरुषायुषो गतत्वात्पक्षताव–च्छेदकधर्माणामनन्तत्वात्। अथवा क्षितित्वादिकस्य न पक्षतावच्छेदकत्व–मनुगतत्वात्। नापि द्वितीयः। तस्यासम्भवात्। न च साध्यमप्युपादान–गोचरापरोक्षज्ञानचिकीर्षाकृतिमतास्मदादिना सिद्धसाधनात्।।४।।

किञ्चैवं निरूपादानस्य ध्वंसस्य कथं सकर्तृकत्वं स्यादतीन्द्रियोपादानस्य शब्दस्य कथमस्मदादिकर्तृकता स्यादुपादानादिपदेनोपायमात्रमेव विवक्षितमिति चेन्न। अस्मदादिनैव सिद्धसाधनात्। अस्मदादीनां सकल–कार्यकैश्चिदुपायाभिज्ञत्वात्। अपि च न परोक्षज्ञानादिमज्जन्यत्वं सकर्तृ–कत्वम्। यागस्य भवदकर्तृकत्वापातात्। न हि तत्रापरोक्षज्ञानं चिकिर्षादि–जनकं किन्तु शाब्दम्। न च कर्तृत्वमेवास्ति, व्यवहारविरोधात्। ज्ञानमेव विवक्षितमिति चेदेवं हि किं ज्ञानमादाय साध्यपर्यवसानं स्यात्। न तावत्प्रत्यक्षं नियामकाभावात्। नापरं तत एव। न च प्रत्यक्षादिविजातीयं ज्ञानपञ्चममेवेश्वरेऽङ्गीकार्यमपसिद्धान्तापातात्।।५।।

किञ्च, प्रत्यक्षत्वादिजातीनां कारणविशेष्यप्रयोज्यतया कथं नित्ये वृत्तिसम्भावनापि यावद्विशेषबाधाद् ज्ञानमपि सिध्येत्। एवमिच्छाप्रयत्नावपि। किं तत्कार्यत्वं कृतिजन्यत्वं वा, प्रागभावप्रतियोगित्वं वा, उत्पत्तिमत्त्वं वा, पूर्वकालासम्बन्धित्वे सत्युत्तरकालसम्बन्धित्वं वा? न तावदाद्यः पक्षः। स्वरूपासिद्धत्वात्। नापि द्वितीयः। ध्वंसेन व्यभिचारात्। नैव तृतीयोऽ–निर्वचनात्। स्वसमानकालप्रतियोगिध्वंसानधिकरणसमयसम्बन्ध उत्पत्ति–रिति चेन्न। चरमध्वंसोत्पत्यव्यापनात्। तस्यापि चोत्पत्तिमत्तया सकर्तृक–त्वाङ्गीकारात्। न चान्यो व्यर्थविशेषणात्कथं वा कर्त्रा सहकारित्वस्य व्याप्तिरपि। कर्ता हि कारणविशेषः। कार्यत्वं च

कार्यमात्रवृत्तिसामान्यम्। न च तत्र कारणविशेषापेक्षा किन्तु कारणत्वेन।।६।।

तथा च कार्यात्कारणमात्रमायाति न तु तद्विशेषः कर्तापि। न च सामान्येनापि रूपेण कर्ता तावत्सिद्ध इति वाच्यम्। सामान्यतो यत्किञ्चित् कारणमादायोपपत्तौ कर्तृत्वादर्शनात्। किञ्च घटि कृति साध्येष्टसाधनताज्ञानं चिकीर्षाद्वारा हेतुः। तच्च न प्रत्यक्षत्वं चिकीर्षाविषयेनागतेन्द्रियस्य सामर्थ्यात्। किन्त्वनुमितिरूपम्। तथा च साध्यविकलो दृष्टान्तः। साध्या-प्रसिद्धिर्वा दोषः।।७।।

अथाशरीरसर्वज्ञनित्यज्ञानादिमान्। कर्ता विवक्षितः। घटादौ च कार्यत्वस्य सशरीरासर्वज्ञानित्यज्ञानादिमत्कर्तृसहचारदर्शनात्।

विशेषविरुद्धत्वमिति।।८।।

ननु ज्ञानत्वनित्यत्वयोः कर्तृत्वाशरीरत्वयोः परस्परविरुद्धत्वेनैकधर्म-समावेशात्कथं नित्यज्ञानादिमत्कर्तृसिद्धिः। किं च घटादौ कृतिसाध्यता हस्तादिद्वारैव गृहीता। न तु साक्षात्। न च पितृपुत्रयोरेकघटसाधनत्वमिव प्रयत्नहस्तादिव्यापारयोः साक्षात्साधनत्वं वाच्यम्। घटार्थं हस्तादिव्यापारयोः साक्षात्साधनत्वं वाच्यम्। घटार्थं हस्तादिना व्याप्रियमाणकुलालसमीप-स्थस्य हस्तादिव्यापारशून्यस्यापि तत्र कर्तृतापत्तेः। न च हस्तादिव्यापारत्ता-शरीरस्य सम्भवति। अन्यादृशि च साध्यता न दृष्टा शरीरतद्व्यापारौ चाङ्कुरे बाधिताविति कुर्तरपि बाध एव।।९।।

किञ्च कर्ता शरीर्येव, ज्ञानमनित्यमेव, बुद्धिरिच्छाद्वारैव, इच्छा कृतिद्वारैव हेतुरित्यादिप्राथमिकबहुव्याप्तिप्रत्यक्षविरोधान्नाशरीरनित्यज्ञानादि कर्तृ-सिद्धिः।।१०।।

ननु क्षित्यादिकर्ता सशरीरो वा अशरीरो वा?

सशरीरश्चेत्तर्हि तच्छरीरं जन्यमजन्यं वा?

जन्यं चेदीश्वरेण वा महेश्वरान्तरेण वा?

यदीश्वरेण तदाशरीरेण वा सशरीरेण वा?

सशरीरेण चेत्तर्हि तच्छरीरं जन्यमजन्यं वा इत्यादिविकल्पस्तदवस्थ एव। तथा चानवस्था। अशरीरेण चेन्न, विरोधात्। महेश्वरान्तरेण चेन्न, महेश्वरान्तरस्यानङ्गीकारात्। अङ्गीकारेण वा विश्वतश्चक्षुरूत विश्वतोमुखो विश्वतो बाहुरूतविश्वतः पात्। सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमो जनयनूदेव एकः। इत्येकत्वप्रतिपादकायाः श्रुतेरप्रमाण्यप्रसङ्गः। अथाजन्यं तदिति चेत् क्षित्यादेरप्यजन्यत्वं स्यात्।।११।।

किञ्चेश्वरशरीरं व्यापकं वाव्यापकं वा? नाद्यम्। व्यापाराघटनात्। व्यापारद्वारा शरीरस्य कारणत्वदर्शनात्। नापि द्वितीयः। देशान्तरे कार्यानुदय-प्रसङ्गात्। तत्र व्यवहिते महेश्वरशरीरस्य व्यापाराघटनात्। अथाशरीरश्चेन्न। अशरीरस्य कर्तृताघटनात्।।१२।।

ननु कर्तृत्वमुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्वं न तु शरीरवत्व-मपीति चेत्तर्हि घटादावपि सशरीरस्य कारणता न स्यादिति चेन्न। प्रत्यक्ष-बाधात्। न चान्वयव्यतिरेकाभ्यां घटादिकार्यं प्रति शरीरस्य कारणत्वं क्लृप्तम्। तथा तन्वादिकार्यं प्रत्यपि शरीरस्य कारणत्वमिति वाच्यम् दृष्टान्त -दृष्टस्य यावद्धर्मस्य दार्ष्टान्तिकेऽसम्भवात्। सम्भवे वा शब्दोऽनित्यः। कृतकत्वात्। घटवदिति। घटदृष्टान्तबलाच्छब्देऽपि रूपत्वं सिद्ध्येत्। न चैवम्। प्रतीतिविरोधात्। तस्मादुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमानेव कारणं तन्वादौ न तु शरीरमपीति।।१३।।

अत्रोच्यते। रूपवत्वकृतकत्वयोर्व्याप्तेरभावान्न शब्दे रूपवत्वं क्षित्यादौ तु शरीरजन्यत्वमपि स्यात्। यद्यत्कार्यं तत्तच्छरीरजन्यमिति व्याप्तिः। न च पक्षे व्यभिचार इति वाच्यम्। क्षित्यादेः शरीरजन्यत्वेऽद्यापि विवादात्। न हि खलु वादस्थले व्यभिचारो दर्शनीयः। किन्तु तदतिरिक्ते। न चायं न्यायः शब्देऽपि समान इति वाच्यम्। पक्षातिरिक्ते पूत्कारादिवायौ व्यभिचारात्। ततस्तयोर्न व्याप्तिरिति वाच्यम्।।१४।।

न च चेष्टायां व्यभिचारात्तयोर्न व्यप्तिरिति वाच्यम्। चेष्टां प्रत्यपि शरीरस्य कारणत्वात्। चेष्टातिरिक्ते हि कार्ये व्यापारद्वारा शरीरस्य कारणत्वं चेष्टारूपकार्ये तु शरीरस्य साक्षात्कारणत्वं न तु व्यापारद्वारा, अनवस्थानात्। ततः पक्षातिरिक्ते अन्वयव्यतिरेकाभ्यां शरीरे कारणत्वस्य क्लृप्ततत्वात्। प्रकृते क्षित्यादावपि शरीरं कारणमस्तु बाधकाभावात्।।१५।।

अथ महेशस्य शरीरकल्पने गौरवमेव बाधकमिति चेत्तर्हि लाघवात् कृतिमज्जन्यमिति स्यात्। न चापरोक्षज्ञानचिकीर्षाभ्यां विना कृतेरनुत्पत्तिरिति वाच्यम्। महेश्वरकृतेर्नित्यत्वेनाभिमतत्वात्।।१६।।

ननु उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्वं कर्तृत्वं न केवलं कृतिमत्वं कर्तृत्वमिति यदि तदा

शरीरोपादानगोचरापरोक्षज्ञानचिकीर्षा–कृतिमत्वं कर्तृत्वं किं न स्यात्? घटादौ तादृशकर्तृत्वस्य दर्शनात्।।१७।।

किञ्च, क्षित्यादिकं न कर्तृजन्यं शरीराजन्यत्वात्, गगनवत्। तथा च नेश्वरः कर्ता, अशरीरत्वात्। मुक्तात्मवदिति चेन्न। सिद्ध्यसिद्धिभ्यां व्याघा–तात्। अथ परोक्षया परेष्टया सिद्धो भगवान्निषिध्यते, इति चेत्तर्हि परेष्टिः किं प्रमाणमप्रमाणं वा? यदि प्रमाणं तर्हि तया बाध्यत्वादनुत्थानं विपरीता–नुमानस्य। अथाप्रमाणं, प्रमाणं विना प्रमेयस्यासिद्धिः। किमनेनोपन्यासेन। अथ प्रमाणं परेष्टिः। तेन विषयीकृतस्य महेश्वरस्य निषेधः सम्भवति। शुक्तिरूप्यस्य निषेधो यथा।।१८।।

किञ्चेश्वरः प्रयोजनं विना कथं प्रवर्तते सुखस्याभावात्। धर्माधर्माभावेन निर्दुःखत्वात्। करुणतया प्रवर्तत इति चेत्तर्हि परसुखदुःखप्रापणप्रहाणे प्रयोजने। तथा च स्वर्गिणमेव सृजेत्।।१९।।

धर्माधर्मपरतन्त्रत्वात्तदनुरूपफलं प्रापयति इति चेत्तर्ह्यावश्यकत्वात् कर्म–निर्मितमेव जगद्वैचित्र्यमस्तु किमीश्वरेण? कर्मनिरपेक्षत्वे च सर्गप्रलयौ सदा स्यातां ज्ञानादीनानित्यत्वात्। ततो न कर्तृत्वं परमेश्वरस्य।।२०।।

तथा न तस्य सर्वज्ञत्वमपि। तथाहि–परमेश्वरः सर्वज्ञो न भवति। चिकीर्षादिमत्वात् पृथ्वीश्वरवत्।।२१।।

अथ सर्वज्ञः कोऽसाविति चेत्? कश्चित् पुरुषः सकलपदार्थसाक्षात्कारी तद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्ध प्रत्ययत्वात्। यः सकलपदार्थ–साक्षात्कारी न भवति तद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्ययो न भवति। यथास्मदादिरित्यनुमानात्सिद्धो यः स सर्वज्ञो नान्यः परमेश्वरादिः। यद्वा परमाण्वादयोऽतीन्द्रियार्थाः कस्यचित् सामान्यप्रत्यासत्यजन्ययोगज–धर्माजन्यजन्यप्रत्यक्षज्ञानविषयाः अनुमितिविषयत्वादस्मदादिवदित्यनुमा–नात्सर्वज्ञसिद्धिरिति सर्व समञ्जसम्।।२२।।

**इति शान्तिवर्णिविरचितायां प्रमेयकण्ठिकायां प्रथमस्तबकः।।**

श्री शान्तिवर्णिविरचिता

# प्रमेयकण्ठिका

## उपसंहार

प्रमेयकण्ठिका जीयात्प्रसिद्धानेकसद्गुणा।
लसन्मार्तण्डसाम्राज्य–यौवराज्यस्य कण्ठिका।।
सन्तीष्कलङ्कं (?) जनयन्ति तर्के,
भाभाति तर्को मम तर्करत्ने।
तेनानिशं ब्रह्मकृतः कलङ्क–
श्चन्द्रस्य किं भूषणकारणं न।।
अस्ति ह्यालोचनाज्ञानं, प्रथमं निर्विकल्पकम्।
बालमूकादिविज्ञान–सदृशं शुद्धवस्तुजम्।।
ततः परं पुनर्वस्तुधर्मो–जात्यादिभिर्यया।
बुद्ध्यावसीयते सापि, प्रत्यक्षत्वेन सम्मता।।

**प्रमेयकण्ठिका समाप्ता।**